শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমহর্ষি ৰাল্মীকি ৰিরচিতম্

॥ শ্রী গঙ্গাষ্টকম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী গঙ্গাষ্টকম্ ॥

মাতঃ শৈলসুতাসপত্নি ৰসুধাশৃঙ্গারহারাৱলি
স্বর্গারোহণৰৈজযন্তি ভৱতীং ভাগীরথি প্রার্থযে।
ৎৱত্তীরে ৰসতস্ত্বদংবু পিবতস্ত্বদ্বীচিষু প্রেঙ্খতঃ
ৎৱন্নাম স্মরতস্ত্বদর্পিতদৃশঃ স্যান্মে শরীরব্যযঃ ॥ **1** ॥

ৎৱত্তীরে তরুকোটরান্তরগতো গঙ্গে ৰিহঙ্গো ৰরং
ৎৱন্নীরে নরকান্তকারিণি ৰরং মৎস্যোঽথৱা কচ্ছপঃ।
নৈৱান্যত্র মদান্ধসিন্ধুরঘটাসঙ্ঘট্টঘণ্টারণ -
ৎকারস্তত্রসমস্তৰৈরিৱনিতালব্ধস্তুতির্ভূপতিঃ ॥ **2** ॥

উক্ষা পক্ষী তুরগ উরগঃ কোঽপি ৱা ৱারণো ৱা
ৱারীণঃ স্যাং জননমরণক্লেশদুঃখাসহিষ্ণুঃ।
ন ৎৱন্যত্র প্ররিরলরণৎকঙ্কণক্কাণমিশ্রং
ৱারস্ত্রীভিশ্চমরমরুতা ৱীজিতো ভূমিপালঃ ॥ **3** ॥

কাকৈর্নিষ্কুষিতং শ্বভিঃ করলিতং গোমাযুভির্লুণ্ঠিতং
স্রোতোভিশ্চলিতং তটাম্বুলুলিতং ৱীচীভিরান্দোলিতম্।
দিব্যস্ত্রীকরচারুচামরমরুৎসংৱীজ্যমানঃ কদা
দ্রক্ষ্যেঽহং পরমেশ্বরি ত্রিপথগে ভাগীরথি স্বং ৱপুঃ ॥ **4** ॥

অভিনৱবিসৱল্লী পাদপদ্মস্য ৱিষ্ণোঃ
মদনমথনমৌলের্মালতীপুষ্পমালা।
জযতি জযপতাকা কাপ্যসৌ মোক্ষলক্ষ্ম্যাঃ
ক্ষপিতকলিকলঙ্কা জাহ্নবী নঃ পুনাতু ॥ **5** ॥

এতত্তালতমালসালসরলব্যালোলবল্লীলতা -
চ্ছন্নং সূর্যকরপ্রতাপরহিতং শঙ্খেন্দুকুন্দোজ্জ্বলম্।
গন্ধর্বামরসিদ্ধকিন্নরবধূতুঙ্গস্তনাস্ফালিতং
স্নানায প্রতিবাসরং ভবতু মে গাঙ্গং জলং নির্মলম্॥ **6**॥

গাঙ্গং বারি মনোহারি মুরারিচরণচ্যুতম্।
ত্রিপুরারিশিরশ্চারি পাপহারি পুনাতু মাম্॥ **7**॥

পাপাপহারি দুরিতারি তরঙ্গধারি
শৈলপ্রচারি গিরিরাজগুহাবিদারি।
ঝঙ্কারকারি হরিপাদরজোঽপহারি
গাঙ্গং পুনাতু সততং শুভকারি বারি॥ **8**॥

গঙ্গাষ্টকং পঠতি যঃ প্রযতঃ প্রভাতে
বাল্মীকিনা বিরচিতং শুভদং মনুষ্যঃ।
প্রক্ষাল্য গাত্রকলিকল্মষপঙ্কমাশু
মোক্ষং লভেৎপততি নৈব নরো ভবাব্ধৌ॥ **9**॥

॥ শ্রী গঙ্গাষ্টকং সমাপ্তম্॥